Gyanshauryam, International Scientific Refereed Research Journal
© 2021 GISRRJ | Volume 4 | Issue 1 | ISSN : 2582-0095

# संस्कृत साहित्ये हिमालयस्य भारतीयसभ्यतायां सांस्कृतिकस्वरूपम्

डॉ. सीता राम शर्मा

प्रोफेसर (साहित्य) राजकीय धुलेश्वर आचार्य, (पी.जी. संस्कृत महाविद्यालय, मनोहरपुर, जयपुर)

**Article Info**
Volume 4 Issue 1
Page Number: 136-140

**Publication Issue :**
January-February-2021

**Article History**
Accepted : 02 Feb 2021
Published :15 Feb 2021

**सारांश** - भारतीयसभ्यतायां संस्कृतभाषाया: साहित्यस्य च विशिष्टपरम्परा वर्तते, यस्या: प्रतिष्ठा सामाजिकसांस्कृतिकधार्मिकपक्षेष्वपि दृग्गोचरी भवति । नदीवनसरोवर- पर्वतादिभि: सह मानवसभ्यताया: संस्कृत्याश्च सम्बन्ध: आदिकालत: वर्तते । भारतीयसंस्कृत्याम् हिमालय: रक्षकरूपेण अभिहित: । हिमालयस्य अङ्केऽव भारतीयसभ्यता-संस्कृति - आध्यात्मञ्चादीनां बीजं सन्निहितोऽस्ति । देवभूमि - हिमालयस्य बहुषु आश्रमेषु तपोवनेषु च ऋषिभिकृततपमाध्यमेन भारतीयसंस्कृति: सुसमृद्धा सुसमपन्ना च जाता। भारतीयसमाजाय अयम् अलौकिकप्रेरणाया: धार्मिकताया: आध्यात्मिकतायाश्च केन्द्रम् । भारतीयसंस्कृत्या: प्रादुर्भावे, तस्या: विकासे च हिमालयसंस्कृत्या: विशिष्टं महत्त्वं वर्तते । एकस्मिन् पक्षे एषा प्राकृतिकसौन्दर्ये जनमानसं प्रभावयति, अपरपक्षे ज्ञानतपाध्यात्मिकवैभवेष्वपि स्वकीया विशिष्टता उपस्थापयति। हिमालय: भारतस्य भौगोलिक विस्तारं रेखाङ्कितं कुर्वन् सति सांस्कृतिकबोध मपि परिभाषयति। भारतस्य सांस्कृतिकजीवनदर्शनं उपस्थापयितुं हिमालयस्य अपूर्वा महत्ता। गगनचुम्बितोतुङ्गशृङ्गहिमालयोऽयं सृष्ट्या : उच्चताया: विशालतायाश्च द्योतक: । अत एष: मानवस्य अहङ्कारदर्पयो: खण्डक: । अत: हिमालय: भारतस्य आध्यात्मिक-भौतिक-सांस्कृतिकप्रगत्या: प्रकाशस्तम्भ इति

**बीजशब्दा**: - हिमालय:, संस्कृति:, देवभूमि:, सभ्यता, आध्यात्मिकता, प्राकृतिकसौन्दर्यम्. भारतवर्षम्

भारतीयसभ्यतायां संस्कृतभाषाया: साहित्यस्य च विशिष्टपरम्परा वर्तते, यस्या: प्रतिष्ठा सामाजिक-सांस्कृतिक-धार्मिकपक्षेष्वपि दृग्गोचरी भवतिं नदीवनसरोवर- पर्वतादिभि: सह मानवसभ्यताया: संस्कृत्याश्च सम्बन्ध: आदिकालत: वर्तते । संस्कृतसाहित्ये हिमालय: न केवलं पर्वतरूपेण, अपितु सामाजिकसांस्कृतिकेतिहासिक- धार्मिकस्थलरूपेण प्रस्तूयते, य: गङ्गायमुनासरस्वत्यादीनां नदीनाम् उद्गमस्थलं, वैदिकदेवकिन्नरयक्षसिद्ध्यादिदेवानाम् क्रीडाक्षेत्रं, शिवपार्वत्यो: निवासभूमि:, नरनारायण्यो: तप: स्थली: प्रकृत्या: पुण्यस्थलञ्चास्ति । वैदिकसाहित्यं विश्वसाहित्ये प्राचीनतम: विद्यते । वेदादेव सृष्टिरुत्पत्ति:, तत्सम्बन्धी समस्यानां समाधानञ्च सम्भवति । हिमालयस्य उत्पत्तिर्विषयक ज्ञानमपि वेदात् सम्प्राप्यते । वैदिकसाहित्ये 'हिमालय' 'हिमवान्', 'हिमवत:', 'हिमवन्त:" इत्यादि - शब्दै: इङ्गितमस्ति । 'हिमवन्त:' इति शब्द अथर्ववेदे पर्वतानां उपाधिरूपेण वर्णितम् । अथर्ववेदे उल्लिखितं यत् हिमालयप्रादुर्भूतनदीनां जलं हृदयरोगनिमित्तं अत्यन्तोपयोगी भवति । हिमालयशब्दस्य व्युत्पत्ति: 'हन' धातो: मकप्रत्यये सति निष्पन्ना भवति, यस्यार्थ: शीतलवस्त्वाकाश- वाष्पश्च।' वाचस्पत्ये हिमालय: 'भारतवर्षस्य सीमापर्वत : ' इति उद्घोषित: । ' शब्दकल्पद्रुमे हिमालयाय नगपतिमेनाधवउमागुरुश्चादि पर्यायशब्दानां प्रयोगं जातम् । सम्पूर्णसंस्कृत- वाङ्मये हिमालयस्य बहुविधरूपाणां दर्शनं प्राप्यते । संस्कृतसाहित्ये हिमालय: जड़चेतनयोरुभयोरपि रूपयो: चित्रं प्रस्तौभि। जड़रूपं नगाधिराजादि उपाधिभि:, तथा च चेतनरूपं राजारूपेण विभूषित: ।'

**Copyright :** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

भारतीयसंस्कृत्याम् हिमालय: रक्षकरूपेण अभिहित: । हिमालयस्य अङ्केऽव भारतीयसभ्यता-संस्कृति - आध्यात्मज्ञादीनां बीजं सन्निहितोऽस्ति । देवभूमि हिमालयस्य बहुषु आश्रमेषु तपोवनेषु च ऋषिभिर्वृततपमाध्यमेन भारतीयसंस्कृति: सुसमृद्धा सुसम्पन्ना च जाता। हिमालयोऽयं वाल्मीकिरामायणे ऋषीणां तपोभूमि:, जलस्रोत- जलप्रवाह- कन्दरादिप्राकृतिक स्रोतैर्युक्तो विदित:।' महाभारतेऽप्ययम् ऋषीणां तपस्थली, तथा च तीर्थस्थलरूपेण प्रस्तुत: । 2 हिमालयस्य उपत्यका अपि पवित्रभूमिरिति संज्ञया अभिहिता:, या: भारतीयजनमानसे स्वदेशप्रेम त्याग - धार्मिकता-अहिंसा- बन्धुत्वादीनाञ्च सन्देशं प्रददति । स्कन्दपुराणस्य केदारखण्डे हिमालयभूमिं स्वर्गभूमिरिति कथिता।' विष्णुपुराणे भारतवर्षस्य भारतीयसंस्कृतेश्च परिभाषणे हिमालयस्य महत्त्व प्रस्तूयते । '

संस्कृतसाहित्ये हिमालयस्य सांस्कृतिकरूपस्य वर्णनं प्राय: कविभि: कृतम् । कुमारसम्भवे कालिदासेन देवात्मा इति संज्ञया हिमालयस्य महत्ता प्रतिपादिता ।' अभिज्ञानशाकुन्तलेऽयं हिमपुरुषरूपेण कल्पित: यत्र हिमिति प्रदेशस्य राजा तथाश्च पार्वत्या: पितुरस्ति।' भारतस्य पश्चिमोत्तरीय- उत्तरीय - उत्तरपूर्वीयाश्च सीमा : हिमालयस्य विविधश्रृङ्खलाभि: विनिर्मिते सदि देशस्य सभ्यता संस्कृति: जीवनास्तित्वञ्च चिरकालपर्यन्तं बाह्याक्रान्तादिभि: सुरक्षितमभूत् । एतदतिरिक्तं हिमालयस्य प्रभावो प्रारम्भत एव भारतीयमानसे साहित्ये दृश्यते । भारतीयसमाजाय अयम् अलौकिकप्रेरणाया: धार्मिकताया: आध्यात्मिकतायाश्च केन्द्रम् । कालिदासस्य रचनासु हिमालयस्य प्राकृतिक सौन्दर्यवर्णनेन सह अस्य समाजिकरीतीणां परम्पराणाञ्च वर्णनं प्राप्यते । ' हिमालयस्य सहृदया, उदारता, रत्नानां बाहुल्यं, शरणागतप्रकृतिरेतस्य रचनासु दृग्गोचरी भवति । रघुवंशे इन्दुमतीस्वयंवरसम्बन्धे भारतस्य चतुर्दिग्जनपदानां तेषां शासकानां राज्यनाञ्च विशिष्टनैसर्गिकी - सुषमा तथा च हिमालयसौन्दर्यं विशदरूपेण प्रस्तुतम्।' सांस्कृतिकैकताया: निर्माणे हिमालयस्य प्रमुख भूमिका । हिमालये संस्थितानां विविध तीर्थानां यात्रा: भाषागतभिन्नत्वे सत्यपि मानवान् एकसूत्रे बध्नाति, मानवीयमूल्यान् साम्प्रदायिक सौहार्द शान्तिमुन्नतिञ्च स्थापयति ।

भारतीयसंस्कृत्या: प्रादुर्भावे, तस्या: विकासे च हिमालयसंस्कृत्या: विशिष्टं महत्त्वं वर्तते। एकस्मिन् पक्षे एषा प्राकृतिसौन्दर्ये जनमानसं प्रभावयति, अपरपक्षे ज्ञानतपाध्यात्मिकवैभवेष्वपि स्वकीया विशिष्टता उपस्थापयति । कालिदास-भास- भारवीत्यादिकवय:, हिमालयी क्षेत्रस्य संस्कृतकवयश्च अस्य प्राकृतिकसौन्दर्यस्य निरूपणं कुर्वन् साहित्यिक-सांस्कृतिकपक्षौ विशेषरूपेण उल्लेखितवन्त: । हिमालयी क्षेत्र हिमाचलस्य संस्कृतरचनासु संस्कृतिरक्षकरूपेण हिमालयस्य प्रस्तुति: । हिमाचलस्य काव्यकार: पण्डितदुर्गादत्तशास्त्रिण विरचिते 'मधुवर्षणम्' इत्यस्मिन् काव्ये हिमालय: भारतस्य प्रहरीरूपेण प्रदर्शित: । रचनाकारकेशवशर्मण: सुनृता - गीतिकाव्ये हिमालय: 'एशियाद्वीपस्य संस्कृते: विधाता' इति संज्ञया अभिहित: । यथा कालिदासस्य अभिज्ञानशाकुन्तले हिमालयीवनस्पतय: सचेतनप्रकृतिरूपे चित्रिता:, तथैव हिमालयीक्षेत्रस्य रचनाकारा: सुरजमुखीबुरांशशीरादय: हिमालयस्य प्राकृतिकसम्पत्तिं प्रतीकरूपेण प्रस्तूयन्ते । वस्तुत: प्रतीका: वर्णितविषयस्य प्रभावं वर्धयन्ति । प्रतीकस्रोतांसि प्राकृतिक- पदार्था:, पौराणिकाख्यानानि, ऐतिहासिकघटना:, राजनैतिकतथ्यादय: भवितुमर्हन्ति । अत एव रचनाकारै: अलङ्कार - रचनार्थं प्राय: प्रकृत्या: उपमानानि गृहीतानि ।

हिमालय: भारतस्य भौगोलिक विस्तारं रेखाङ्कितं कुर्वन् सति सांस्कृतिकबोध मपि परिभाषयति । भारतस्य सांस्कृतिकजीवनदर्शनं उपस्थापयितुं हिमालयस्य अपूर्वा महत्ता। गगनचुम्बितोतुङ्गशृङ्गहिमालयोऽयं सृष्ट्या: उच्चताया: विशालतायाश्च द्योतक: । अत एष: मानवस्य अहङ्कारदर्पयो: खण्डक: । मानवीयसंवेदनानां अभिव्यक्तौ कालिदासविरचितमेघदूते आनन्दप्रतीकरूपेण प्रस्तुत: हिमालय: । प्राकृतिकस्रोतागारे हिमालये नदी - जलप्रपात - जलाशय - कन्दरादीनाम् प्राप्तिर्भवति । हिमालयोद्भवा नदी पुराणेषु 'हिमवत्पादनि: सृता:' इति कथिता । गङ्गा-सरस्वती - शतुद्री - चन्द्रभागा - यमुना - सरयू - वितस्ता- विपाशा - देविका - लोहित्यादय: नद्य: हिमालसयात् प्रभवन्ति । ' पुराणानुसारं हिमालयोद्भवा: नद्य: महावेगवत्य: भवन्ति, तथा च तासां जलानि

वैदूर्यमणिसमस्वच्छानि मधुराणि च भवन्ति । मार्कण्डेयपुराणे नदीनां वर्णनं सर्वपापहारिणीरूपेण प्राप्यते ।' महाभारते हिमालयप्रवाहितनद्यः जलानां मधुरताकारणात् विश्वस्य मातेत संज्ञिताः । अतः प्राकृतिकस्रोतानां महत्तां परोपकारस्य चोल्लेख कुर्वन् मत्स्यपुराणे हिमालयस्य शतशः सुष्ठु जलप्रपातानां वर्णनं प्राप्यते । ' एतदतिरिक्तं हिमालयः विविधरत्नानां भण्डागारोऽपि वर्तते । कविभिरपि हिमालयः नानारत्नपरिपूर्णः कथितः । हिमालयस्यांशः कैलाशः कुबेरनगरीरूपेण सुविख्यातः । महाकविकालिदासानुसारं हिमालयोऽयम् अनन्तरत्नानाम् उत्पादकोऽस्ति येन हिमस्यातिशयतापि तस्य सौभाग्यं न नश्यति । कुमारसम्भवेऽप्युल्लिखतं यत् हिमालये गैरिकसिन्दूरादिधातूनां मिश्रितशैलः प्राप्यते यस्य प्रयोग अप्सराणां प्रसाधननिमित्तं भवति । विविधधातूनां प्राप्तिस्थलभूतत्वात् कालिदासेन हिमालयः 'धातुताम्रधरः ' इति संज्ञया अभिहितः । किरातजुनीयेऽपि हिमालये प्राप्तानाम् अनेकविधरत्नानामुल्लेखः संप्राप्यते । ब्रह्मपुराणे हिमालयसन्दर्भे 'हिमवन्तं रत्नमयं' इति प्राप्यते । महाभारतस्य गङावतरणप्रसङ्गे हिमालयशिखरेषु विविधरत्नधातूनां दर्शनं भवति । अत एव बहुविध रत्नैः परिपूर्णोऽयं हिमालयः भारतसमृद्धौ सहायकः ।

**निष्कर्षः** - संस्कृतसाहित्ये हिमालयः भौतिकस्वायत्ततापेक्षया देवतारूपेण, एवञ्च प्रकृत्याः अलङ्काररूपेण प्रस्तुतः । हिमालयस्य श्रृङ्क्षलासु, सरितानां सङ्गमेषु ऋषीणां मेधा प्रेरणां प्राप्ता । अतः संस्कृतसाहित्ये 'वसुधैवकुटुम्बकम्' इत्यादि - सद्भावानां प्रस्तावकरूपेण हिमालयः वर्णितः । हिमालयः भारतीयजीवनदर्शने मानवीयमूल्यानां मानदण्ड इव उपस्थापितः । जड़चेतनयोरुभयोरपि रूपयोः मानवीयमूल्यानाम् उच्चादर्शाणाञ्च प्रतीतिः सम्यकतया जायते । स्वविशालता - दिव्यता - भव्यतादिकारणत्वादयं मानवजीवनदर्शने प्रेरणायाः स्रोतः । नदी - रत्न - जलाशय - औषधादीनां सन्धात्री एषा पवित्रदेवभूमिः भारतीयसंस्कृत्याः मूलं संधारयति । भारतस्य भौगोलिक विस्तारस्य सीमानिर्धारके हिमालये भारतीयसांस्कृतिकगहनतायाः दिग्गदर्शनमपि भवति । हिमालये प्रादुर्भताः नद्यस्सर्वतृप्तिकराः, औषधयश्चारोग्यकराः । अतः हिमालयः भारतस्य आध्यात्मिक-भौतिक-सांस्कृतिकप्रगत्याः प्रकशस्तम्भ इति । संस्कृतसाहित्ये हिमालयस्य वर्णनम् असकृत् उपलभ्यते । अस्मिन् शोधलेखे सांस्कृतिकदृष्ट्या हिमालयस्य कीदृशं स्वरूपं विद्यते इति उपवर्णितः अस्ति ।

**सन्दर्भग्रन्थाः**


1. अथर्ववेद का सुबोधभाष्य. दामोदरसातवलेकरः पारडी : स्वाध्यायमण्डलम्, 1938. अग्रवाल, वासुदेवशरणः. मार्कण्डेयपुराण का सांस्कृतिक अध्ययन. इलाहाबाद : हिन्दुस्तानी अकेडमी, 1961.
2. अभिज्ञानशाकुन्तलम्, (अनु) बाबूराम त्रिपाठी. आगरा: रतनप्रकाशनम्, 1989. ऋग्वेद संहिता, पूना: वैदिक संशोधन मंडल, 1972.
3. ऋतुसंहार. कालिदासः (व्या ) रांगेयराघवः. दिल्लीः आत्माराम एण्ड संस, 1973.
4. कालिदास ग्रन्थावली. ( व्या ) पण्डित रामतेजशास्त्री. (सं) ब्रह्मानन्द त्रिपाठी, वाराणसीः चौखम्बासुरभारतीप्रकाशनम्, 2014.
5. किरातार्जुनीयम्. भारवि. ( व्या ) बदरीनारायण मिश्र वाराणसी : चौखम्बा- सुरभारतीप्रकाशनम्, 2012.
6. कुमारसम्भवम्. कालिदास : ( व्या ) कृष्णमणि त्रिपाठी. वाराणसीः चौखम्बासुरभारतीप्रकाशनम्, 2011.
7. कुमार, कृष्ण. प्राचीन भारत का भौगोलिक परिवेश. हरिद्वार : मयंक प्रकाशनम्, 2004.
8. काण्डपाल, भवानीदत्तः कुमाऊँनी का संस्कृतमूलक व्याकरण, भाषा विज्ञान एवं साहित्य. हरिद्वारः उत्तराखण्ड संस्कृत अकादमी, 2007.
9. चातक, गोविन्दः भारतीय लोकसंस्कृति का सन्दर्भ, मध्य हिमालय, नई दिल्लीः तक्षशिलाप्रकाशनम्, 1990.
10. मेघदूतम्. कालिदास : ( व्या ) दयाशंकरशास्त्री. वाराणसी : चौखम्बासुरभारती- प्रकाशनम्, 2014.

**सन्दर्भग्रन्थसूचि:**


1. यस्येमे हिमवन्तो महित्वा यस्या समुद्रं रसया सहाहु: ।
यस्येमा: प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥ ऋग्वेद: 10.121.4
2. गिरियस्ते पर्वता हिमवन्तोरणयं ते पृथिवी स्योनमस्तु ।
वधुं कृष्णं रोहिणी विश्वरूपां ध्रुवां भूमिं पृथिवीमिन्द्रगुप्ताम् ।
अजीतोहतोअक्षतोध्यष्ठङ्गं पृथिवीहम् ॥ अथर्ववेद : 12.1.11
3. हिमवत: प्रस्रवन्ति सिन्धौ समह सङ्गम: ।
आपो ह मह्यं तद् देवर्ददन् हृद्द्योतभेषजम् ॥ अथर्ववेद : 6.24.1
4. उणादि 1.146
5. वाचस्पत्यम्, पृष्ठ 5428
6. अस्त्युत्तरस्यां दिशि देवात्मा हिमालयो नाम नगाधिराज: ।
पूर्वापरौ तोयनिधि विगाह्य स्थित: पृथिव्या इव मानदण्ड: ॥ कुमारसम्भवम्, 1.1
7. अथ पर्वतराजोऽसौ हिमवान् ध्यानकोविद: ।
दुहितुर्देवदेवेन ज्ञात्वा तदभिमन्त्रितम्॥ ब्रह्मपुराणम् 36.2
8. वाल्मीकिरामायणम्, 1.42.3, 1.48.33, 4.11.12-13
9. महाभारतम्, 12.314.23-24
10. गंगाद्वारोत्तरं विप्र स्वर्गभूमि: स्मृताबुधै: । अन्यत्र पृथिवी प्रोक्ता गंगाद्वारोत्तरं बिना । इदमेव महाभाग स्वर्गद्वारं स्मृतं बुधै: । यस्य दर्शनमात्रेण विमुक्तो भवबंधनै: ॥ स्कन्दपुराणम्, केदारखण्ड:, 106.4
11. उत्तरं यत् समुद्रस्य हिमाद्रिश्चैव दक्षिणम् ।
वर्षं तत् भारतं नाम भारती यत्र संतति: ॥ विष्णुपुराणम्, 2.3.1
12. अस्त्युत्तरस्यां दिशि देवात्मा हिमालयो नाम नगाधिराज: ।
पूर्वापरौ तोयनिधि विगाह्य स्थित: पथिव्या इव मानदण्ड: ॥ कुमारसम्भवम्, 1.1
13. कार्या सैकतलीनहंसमिथुना स्रोतोवहामालिनी पादास्तामथितो निषण्णहरिणा गौरागुरो: । शाखालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यध: शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम्॥ अभिज्ञानशाकुन्तलम्, 6.17
14. अयाचितारं न हि देवदेबमद्रि: सुतां ग्राहयितुं शशाक ।
अभ्यर्थनाभङ्गयेन साधुमाध्यस्थ्यमिष्टेऽप्यवलम्बतेऽर्थे ॥ कुमारसम्भवम्, 1.52
15. रघुवंशम्, 4.71-75, 77
16. मधुवर्षणम्, तृतीयसर्ग:
17. मेघदूतम्, 52-55
18. वपायुपुराणम्, 45.94.96, ब्रह्मपुराणम्, 27.25-27, मार्कण्डेयपुराणम्, 57.16-18
19. विश्वस्य मातर: सर्वा: सर्वपापहरा: स्मृता: ।
अन्या: सहस्रशश्चोक्ता: क्षुद्रनद्यो द्विजोत्तम् ॥ मार्कण्डेयपुराणम्, 57. 31

20. विश्वस्य मातरः सर्वाः सर्वाश्चैव महाफलाः ।

तथा नद्यस्त्वप्रकाशाः शतशोऽथ सहस्रशः।। महाभारतम्, भीष्मपर्व : 9.37

21. महाप्रपातसंपातप्रपातादिगताम्बुभिः।

वायुनीतैः सदातृप्तिकृतिदेशं क्वचित्क्वचित् ।। मत्स्यपुराणम्, 117.17

22. कुमारसम्भवम्, 6.51